# ॥ भैरवप्रोक्त शिवस्तोत्रम् ॥

धरापोग्निमरुद्व्योममखेशेन्द्वर्कमूर्तये ।

सर्वभूतान्तरस्थाय शङ्कराय नमो नमः ॥ १ ॥

श्रुत्यन्तःकृतवासाय श्रुतये श्रुतिजन्मने ।

अतीन्द्रियाय महसे शाश्वताय नमो नमः ॥ २ ॥

स्थूलसूक्ष्मविभागाभ्यामनिर्देश्याय शम्भवे ।

भवाय भवसंभूतदुःखहन्त्रे नमोऽस्तु ते ॥ ३ ॥

तर्कमार्गातिभूताय तपसां फलदायिने ।

चतुर्वर्गवदान्याय सर्वज्ञाय नमो नमः ॥ ४ ॥

आदिमध्यान्तशून्याय निरस्ताशेषभीतये ।

योगिध्येयाय महते निर्गुणाय नमो नमः ॥ ५ ॥

विश्वात्मनेऽविचिन्त्याय विलसच्चन्द्रमौळये ।

कन्दर्पदर्पनाशाय कालहन्त्रे नमोऽस्तु ते ॥ ६ ॥

विषाशनाय विहरद्वृषस्कन्धमुपेयुषे ।

सरिद्धामसमाबद्धकपर्दाय नमो नमः ॥ ७ ॥

शुद्धाय शुद्धभावाय शुद्धानामन्तरात्मने ।

पुरान्तकाय पूर्णाय पुण्यनाम्ने नमो नमः ॥ ८ ॥

भक्ताय निजभक्तानां भुक्तिमुक्तिप्रदायिने ।

विवाससेऽविवासाय विश्वशास्त्रे नमो नमः ॥ ९ ॥

त्रिमूर्तिमूलभूताय त्रिनेत्राय नमो नमः ।

त्रिधाम्ना धामरूपाय जन्मघ्नाय नमो नमः ॥ १० ॥

देवासुरशिरोरत्नकिरणारुणिताङ्घ्रये ।

कान्ताय निजकान्तायै दत्तार्धाय नमो नमः ॥ ११ ॥

स्तोत्रेणानेन पूजायां प्रीणयेज्जगतः पतिम् ।

भुक्तिमुक्तिप्रदं भक्त्या सर्वज्ञं परमेश्वरम् ॥ १२ ॥

तस्यसाध्यं त्रिभुवने न किञ्चिदपि वर्तते ।

ऐहिकं किं फलं तत्र मुक्तिरेव करे स्थिता ॥ १३ ॥

॥ इति भैरवप्रोक्तं शिवस्तोत्रं समाप्तम् ॥

**|| bhairavaprokta śivastotram ||**

dharāpognimarudvyomamakheśendvarkamūrtaye |

sarvabhūtāntarasthāya śaṅkarāya namo namaḥ || 1 ||

śrutyantaḥkṛtavāsāya śrutaye śrutijanmane |

atīndriyāya mahase śāśvatāya namo namaḥ || 2 ||

sthūlasūkṣmavibhāgābhyāmanirdeśyāya śambhave |

bhavāya bhavasambhūtaduḥkhahantre namo'stu te || 3 ||

tarkamārgātibhūtāya tapasāṁ phaladāyine |

caturvargavadānyāya sarvajñāya namo namaḥ || 4 ||

ādimadhyāntaśūnyāya nirastāśeṣabhītaye |

yogidhyeyāya mahate nirguṇāya namo namaḥ || 5 ||

viśvātmane'vicintyāya vilasaccandramauḻaye |

kandarpadarpanāśāya kālahantre namo'stu te || 6 ||

viṣāśanāya viharadvṛṣaskandhamupeyuṣe |

sariddhāmasamābaddhakapardāya namo namaḥ || 7 ||

śuddhāya śuddhabhāvāya śuddhānāmantarātmane |

purāntakāya pūrṇāya puṇyanāmne namo namaḥ || 8 ||

bhaktāya nijabhaktānāṁ bhuktimuktipradāyine |

vivāsase'vivāsāya viśvaśāstre namo namaḥ || 9 ||

trimūrtimūlabhūtāya trinetrāya namo namaḥ |

tridhāmnā dhāmarūpāya janmaghnāya namo namaḥ || 10 ||

devāsuraśiroratnakiraṇāruṇitāṅghraye |

kāntāya nijakāntāyai dattārdhāya namo namaḥ || 11 ||

stotreṇānena pūjāyāṁ prīṇayejjagataḥ patim |

bhuktimuktipradaṁ bhaktyā sarvajñaṁ parameśvaram || 12 ||

tasyasādhyaṁ tribhuvane na kiñcidapi vartate |

aihikaṁ kiṁ phalaṁ tatra muktireva kare sthitā || 13 ||

|| iti bhairavaproktaṁ śivastotraṁ samāptam ||

www.kamakotimandali.com